श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री विष्णुधर्मे बलि कृता

# ॥ श्री सुदर्शनस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री सुदर्शनस्तुतिः ॥

बलिरुवाच

अनन्तस्याप्रमेयस्य विश्वमूर्तेर्महात्मनः।
नमामि चक्रिणश्चक्रं करसङ्गि सुदर्शनम्॥ 1 ॥

सहस्रमिव सूर्याणां सङ्घातं विद्युतामिव।
कालाग्निमिव यच्चक्रं तद्विष्णोः प्रणमाम्यहम्॥ 2 ॥

दुष्टराहुगलच्छेदशोणितारुणतारकम्।
तन्नमामि हरेश्चक्रं शतनेमि सुदर्शनम्॥ 3 ॥

यस्यारकेषु शक्राद्या लोकपाला व्यवस्थिताः।
तदन्तर्वसवो रुद्रास्तथैव मरुतां गणाः॥ 4 ॥

धारायां द्वादशादित्याः समस्ताश्च हुताशनाः।
धाराजालेऽब्धयः सर्वे नाभिमध्ये प्रजापतिः॥ 5 ॥

समस्तनेमिष्वखिला यस्य विद्याः प्रतिष्ठिताः।
यस्य रूपमनिर्देश्यमपि योगिभिरुत्तमैः॥ 6 ॥

यद्भ्रमत्सुरसङ्घानां तेजसः परिबृंहणम्।
दैत्यौजसां च नाशाय तन्नमामि सुदर्शनम्॥ 7 ॥

भ्रमन्मतमहावेगविभ्रान्ताखिलखेचरम्।
तन्नमामि हरेश्चक्रमनन्तारं सुदर्शनम्॥ 8 ॥

नक्षत्रवद्वह्निकणव्याप्तं कृत्स्नं नभस्तलम्।
तन्नमामि हरेश्चक्रं करसङ्गि सुदर्शनम्॥ **9** ॥

स्वभावतेजसा युक्तं यदर्काग्निमयं महत्।
विशेषतो हरेर्गत्वा सर्वदेवमयं करम्॥ **10** ॥

दुर्वृत्तदैत्यमथनं जगतः परिपालकम्।
तन्नमामि हरेश्चक्रं दैत्यचक्रहरं परम्॥ **11** ॥

करोतु मे सदा शर्म धर्मतां च प्रयातु मे।
प्रसादसुमुखे कृष्णे तस्य चक्रं सुदर्शनम्॥ **12** ॥

स्वभावतेजसा युक्तं मध्याह्नार्कसमप्रभम्।
प्रसीद संयुगेऽरिणां सुदर्शनसुदर्शनम्।
विद्युज्ज्वालामहाकक्षं दहान्तर्मम यत्तमः॥ **13** ॥

जहि नो विषयग्राहि मनो ग्रहविचेष्टितम्।
विस्फोटयाखिलां मायां कुरुष्व विमलां मतिम्॥ **14** ॥

॥ इति श्री सुदर्शनस्तुतिः समाप्ता ॥